# Shrikrishna Bhajana Ashtakam

# શ્રીકૃષ્ણભજનાષ્ટકમ્

## Document Information

Text title : Shrikrishna Bhajana Ashtakam

File name : shrIkRRiShNabhajanAShTakam.itx

Category : vishhnu, pradIptakumAranande, krishna, aShTaka

Location : doc_vishhnu

Author : (Copyright) Pradipta Kumar Nanda, Kendrapara, Orisa pknanda65 at gmail.com

Acknowledge-Permission: (Copyright) Pradipta Kumar Nanda

Latest update : September 7, 2020

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

December 28, 2020

*sanskritdocuments.org*

# શ્રીકૃષ્ણભજનાષ્ટકમ્

કંસદલનમુક્તિમિલનભુક્તિભવનકાશિતં
    દુષ્ટશકટરાહુકપટકાલિયશઠશાસિતમ્ ।
દાનવમધુકૈટભમુરદારુણવકનાશિતં
    કૃષ્ણચરણપઙ્કજસુખદીપ્તભજનભાસિતમ્ ॥ ૧॥

બ્રહ્મકિરણમુગ્ધવદનમઙ્ગલમયવીક્ષણં
    સાન્દ્રલલિતકુઞ્જનિકટકેલિતરલકારણમ્ ।
ધર્મવિનતકર્મનિરતભોગનિકરધારિતં
    કૃષ્ણચરણપઙ્કજસુખદીપ્તભજનભાસિતમ્ ॥ ૨॥

પૂર્ણપુરુષયોગજનકભોગસકલધારકં
    દુસ્તરભવપારકપટુનાવિકહરિનામકમ્ ।
દુર્જનમુખમર્દનગુણવર્દ્ધનદરદારિતં
    કૃષ્ણચરણપઙ્કજસુખદીપ્તભજનભાસિતમ્ ॥ ૩॥

વૈભવસુખસાગરતટશુદ્ધસલિલશીતલં
    સ્મિતરુચિરફુલ્લકમલવેણુનિનદકોમલમ્ ।
મન્દમલયચન્દનમુખનન્દિતશુભવન્દિતં
    કૃષ્ણચરણપઙ્કજસુખદીપ્તભજનભાસિતમ્ ॥ ૪॥

શાન્તસરલભક્તવિધુરમાધવમધુસૂદનં
    દેવમદનમોહન-અપવર્ગવિભવધારિણમ્ ।
ગોપયુવતિવલ્લભચિરસુન્દરતરલાયિતં
    કૃષ્ણચરણપઙ્કજસુખદીપ્તભજનભાસિતમ્ ॥ ૫॥

વલ્લવલલનાસુખમુખચુમ્બનરતિવિહ્વલં
    ચારુહસનપીતવસનમોહનશશિમણ્ડલમ્ ।
વન્યકુસુમનમ્રસુષમસજ્જિતદમધારિતં
    કૃષ્ણચરણપઙ્કજસુખદીપ્તભજનભાસિતમ્ ॥ ૬॥

પ્રેમખચિતકુઞ્જસદનકેલિકુતુકનર્તનં
    યામુનતટમણ્ડલનટપાટવજલખેલનમ્ ।
લુબ્ધલલિતરાસકલિતકુઙ્કુમમૃદુવાસિતં
    કૃષ્ણચરણપઙ્કજસુખદીપ્તભજનભાસિતમ્ ॥ ૭॥

પ્રેમકરુણમૂર્તિતરુણપૂર્તિસકલકારકં
    ભક્તનયનચિત્રિતનવનાટકનટનાયકમ્ ।
દારુપુરુષનેત્રવલયસર્વભુવનભૂષિતં
    કૃષ્ણચરણપઙ્કજસુખદીપ્તભજનભાસિતમ્ ॥ ૮॥

ઇતિ નન્દપ્રદીપ્તકુમારવિરચિતં શ્રીકૃષ્ણભજનાષ્ટકં સમ્પૂર્ણમ્ ।

---

*Shrikrishna Bhajana Ashtakam*

pdf was typeset on December 28, 2020

Please send corrections to *sanskrit@cheerful.com*